This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

प्रणवकल्प

K K S U LIBRARY
RAMTEK
441 106
M-899
Dist Nagpur

Accession No :- ~~7173~~ M899.
Title :- प्रणवकल्प.
Author :- स्कन्दपुराणे.
Subject :- ?
Date :- ?
पत्रे : ㉔

①

Checked 2012

क०॥१

॥श्रीगणेशायनमः॥श्रीसरस्वत्यैनमः॥श्रीदक्षिणामूर्तिर्जयति॥श्रीवेदव्यासायनमः॥
॥सत्रांते नैमिशारण्ये शौनकस्य महीयसः॥ आशीनं मुनिशार्दूलं सूतं पौराणिकोत्=
॥तमं॥१॥ समागत्य परीवत्य शौनकाद्या महर्षयः॥ यथेष्टाः सत्कथाः पुण्याः पर्य
॥पृछन्मुमुक्षयो॥२॥ मंत्रान्प्रसंजयंस्तत्र शौनकः प्रत्यभाषत॥ शौनक उ
॥वाच॥ सूतसूत महाप्राज्ञ व्यासशिष्य महामते॥३॥ श्रुताः पुराणसंसिद्धा
॥मंत्रा गोप्याश्च तत्कथाः॥ कृष्णद्वैपायनात्सर्वास्तत्कृपाद्धास्त्वयि प्रभो॥४॥ द्वि६
॥अज्ञातं तत्वनास्त्येवतस्मात्पौराणिकोत्तम॥ सप्तकोटिमहामंत्राः सां
॥गोपांगाजपंति वै॥५॥ अपवर्गप्रदः कोवा तत्र नो वद भूसुरः॥ यज्ज=
॥पान्मुच्यते जंतुर्जन्मसंसारबंधनात्॥६॥ इत्युक्तो मुनिभिः सूतः प्रोवा

च मुनिसत्तमान्॥ सूत उवाच॥ भो भो हे मुनयः श्रेष्ठाः साधु पृष्ठं महात्मभिः॥७॥ सं
सारासारबुद्धीनां मोक्षेच्छा भवति ध्रुवं॥ शार्दूलपशुजातीनामाश्रमप्रांतवर्ति
नां॥८॥ नास्ति वैरं कुतो वोस्ति ततो वक्ष्यामि वांछितं॥ अपवर्गप्रदांनेप्रण
वान्नपरो मनुः॥९॥ ततोपूयंतमोवेस्यं मंत्रं जपत सत्तमाः॥ नृसिंहमंत्र
राजाख्यास्तारतम्येफलप्रदाः॥१०॥ तस्माज्जपत तं यूयं सांगं मनुमनुत्त
मं॥ अत्रैवोदाहरंतीममितिहासं पुरातनं॥११॥ पुरा गौर्या महादेव्याः
पृष्टो व्याचष्टे भूसुराः॥ कदाचिदीश्वरः शंभुस्तपस्तेपे हिमाचले
॥१२॥ पार्वतीकन्यकाभूत्वा देवं शुश्रूषया सदा॥ तोषयामास तां देवस्तु
ष्टः प्रोवाच सस्मितं॥१३॥ ईश्वर उवाच॥ वरं वृणीष्व हे गौरि प्रीतोस्मि तवसे ७१

②

रया॥ नासाध्यं विद्यते मेत्र धनधान्यगृहादिषु॥१४॥ इत्युक्तो वचनं प्राह मेघगंभी
रया गिरा॥ पार्वत्युवाच॥ भवं स्यजामि येनाहं मोक्षं ब्रह्मास्तिलक्षणं॥१५॥
प्राप्नुयां तमिमं देवमंत्रं मह्यमुपादिश॥ आह प्रहृष्टस्तदा देवो मैवं वद शुभे
क्षणे॥१६॥ अज्ञाननाशनद्वारं प्रणवो मोक्षदायकः॥ न तत्र योग्यता ते
स्ति यतो नारी भवस्यहो॥१७॥ गायत्र्यो द्विजसंघानां यतीनां प्रणवे रतिः
नारीणां भर्तृशुश्रूषा न जपा न तपो व्रतं॥१८॥ ततो वरय राज्यादिप्रा
प्तिं यद्यस्ति ते मनः॥ कर्मणा मनसा वाचा ये स्यजंति यतीश्वराः॥१९॥ गा
यत्रीमथ सावित्रीं तेषां प्रणवयोग्यता॥ आह पृष्टैवमीशानं मैवं भाष
स्व शंकर॥२०॥ क्लीबस्य पुरुषो योषा चरं चाचरमेव च॥ सर्वं ब्रह्मन तद्वि

ज्ञानमद्वैतं परमार्थतः॥२१॥ चतुष्टयं साधनाख्यं यत्र तत्रैव योग्यता॥ ततो वद
मया पृष्टं तारकं भवतारकं॥२२॥ तारकं रूपमास्थाय ब्रह्म प्राप्नोत्यसंश
यं॥ तुतोष वचनं श्रुत्वा वाक्यं प्रोवाच शंकरः॥२३॥ ईश्वर उवाच॥ कृतार्था
सि कृतार्थासि मुमुक्षा यत्तवास्ति भो॥ इत्युक्तोपदिदेशैतं तारकं भवतारकं॥२४॥ अंगा व
न्यपि तथा तस्यै भाषते परमेश्वरः॥ प्रथमं कवचं दिव्यं पंजरं तदनंतरं॥२५॥
हृदयं प्रणवार्थाख्यं नाम्नामष्टोत्तरं शतं॥ अंगस्तुतिं तथा मंत्रपुरश्चरणप
द्धतिं॥२६॥ अंगन्यासं करन्यासं महात्म्यं तदपेक्षितं॥ नाम्नां सहस्रदिव्यानां
प्रणवस्य शुचिस्मिते॥२७॥ स्तवराजादि सर्वाणि मालामंत्रमनुस्मृतिं॥ मंत्र
मात्रस्य सर्वस्याप्येतान्यंगानि पार्वती॥२८॥ अंगहीनो मनुर्जप्तो भस्माहुतिस

③

मोभवेत्॥ ॐकारजंजपूकानांजप्यान्यंगानिदंडिनां॥२९॥ इत्येवंसकलैरंगैः पार्वत्या
उपदिष्टवान्॥ जज्ञापंचमहादेवीमोक्षायकमलेक्षणा॥३०॥ आचरंतोभवंतोपि
लभंतांमोक्षमुत्तमं॥ मुनयऊचुः॥ तथोपदिष्टासूतत्वंमपथेष्टोलोमहर्षणे॥३१
अंगानिसकलान्येवंमंत्रमोंकाररूपिणः॥ सूतउवाच॥ अंगानांचविसुध्य
र्थमंगस्तुतिमहंब्रुवे॥३२॥ इतिप्रणवपीठिका॥ मस्तकत्वंदेवतानिनंम=
प्रणवरूपिणं॥ युवांचअणुतंश्रोत्रेप्रणवार्थंचनान्यथा॥३३॥ युवांचप
श्यतंनेत्रेप्रणवार्थविलेखनं॥ युवांचवहतंहस्तौप्रणवार्थस्यपुस्तकं॥३४॥
युवांचगच्छतंपादौबोधकोयत्रतस्यवै॥ मनोमनुष्वभद्रंतेप्रणवार्थंशुभ
प्रदं॥३५॥ बुद्धेनिश्चयतस्मात्वंनान्यदस्तीतिचित्तक॥ चिंतयोंकारतामर्थं

भेदबुद्धिनिवारकं॥३६॥ अहंकाराहंकुरुष्वप्रणवार्थविशोचने॥ मयातुल्योनचास्ती
तिसंसारार्णवशोषणे॥३७॥ प्राणान्धारयमद्देहमावंदोंकारशोधनं॥ किमत्र
बहुनोक्तेनसर्वाण्यंगानिमेसदा॥३८॥ रमंतांप्रणवेदिव्येनतुमंत्रांतरेभ्रमात्
इदंव्याप्तंयतस्तेनब्रह्मरूपेणसर्वशः॥३९॥ इत्येवोचमहंविप्रा अंगस्तुतिमनु
त्तमां॥ इतिअंगस्तुतिसमाप्ता॥ सूतउवाच॥ अथातः संप्रवक्ष्यामिकवचंवज्रसं
मितं॥४०॥ यस्यस्मरणमात्रेणमुच्यतेपातकैर्द्विजाः॥ कवचानांराजराजंशा
श्वतंमोक्षदंशुभं॥४१॥ प्रणवकवचस्यपरब्रह्मऋषिः॥ अनुष्टुप्छंदः॥ परमा
त्मादेवता॥ अंबीजं॥ उंशक्तिः॥ मंकीलकं॥ अकारादिभिस्त्रिभिः करांगन्यासः॥
ध्यानं॥ ॐकारमाद्यंपरमात्मरूपंसंसारनाशेचसमर्थमंत्रं॥ अचंचलंप्राप्य
मजिह्मभक्तैर्ध्यायेसदादेहिलोकत्राक्यमाताते॥१॥ न्यासंकृत्वाततोध्यात्वाकवचं

प्रजपेत्सुधीः॥ ॐकारः पातु मूर्धानं सहस्रारेण शोभितं॥२॥ तारकं मे भ्रुवोर्मध्य
मालाचक्रविराजितं॥ प्रणवः श्रोत्रयुग्मं च नेत्रयुग्मं प्रपंचगः॥३॥ नासिकां नासि
काध्यक्षस्तालु पातु परात्परः॥ चुबुकं सर्वदः पातु दंतान्दानवनाशकः॥४॥ ओ
ष्ठद्वयं सदा पायो कंठं पातु ममाव्ययः॥ भुजद्वयं भुवोध्यक्षः करौ पातु करावे
तिः॥५॥ कुक्षिं मे पातु सततं पृष्ठं पातु पुरुषोत्तमः॥ कवचद्वयं सदा रक्षेद्देदांन
वनगोचरः॥६॥ नाभिं पातु नराकारो जघने परमेश्वरः॥ गुह्यस्थाने गुह्यरूप
उरू पातु स्वयंभवः॥७॥ अवाच्यो जानुनोर्मध्ये जंघे जंभारिशोवितः॥ पादद्व
यं तथा विहरूपं नर्भविहरो नखान्॥८॥ सर्वाण्यंगानि सर्वात्मा पातु वाणीमनः
प्रियः॥ प्राचीनदेशतः पातु मामवाचीनदेशतः॥९॥ प्रतीचीनप्रदेशाच्च पा
याप्रसक्तस्वरूपकः॥ उदीचीनप्रदेशाच्च पातु मां मनुजेश्वरः॥१०॥ ऊर्ध्वाधो

देशतः पातु त्रिमूर्तिश्च स्वस्वरूपकः॥ पंचभूतात्मकः पातु पंचभूतातिभीलितः॥११॥
ज्ञानेंद्रियाणि तद्वपीकल्तकर्मेंद्रियाणि च॥ षण्णामरीणां वर्गं च हिनस्तु मेऽद्य प
णमम॥१२॥ षड्भावविकारांलीर्मे च द्वंद्वदुःखानि सर्वशः॥ हिनस्तु सप्तधातूंश्च नी
रोगान्सकरोति च॥१३॥ व्याघ्रचौरादिभीतेश्च पातु मां तत्तदाकृतिः॥ सूत
उवाच॥ मार्गभीत्या शत्रुभीत्या चोरभीत्या च कंपितः॥१४॥ इदं च कवचं जप्त्वा
मुच्यते भीतितस्ततः॥ व्याघ्रादिप्रबलग्रस्तो जपान्मुक्तिमवाप्नुयात्॥१५॥
जपित्वा कवचं नूनं तरंति भवसागरं॥ कवचेन युतो राजा शत्रून्निवदुरास
दान्॥१६॥ तस्मात्पठंतु सततं त्रिषु कालेषु योगिनः॥ ॐकारकवचं गौर्या
इसेवं शंभुरब्रवीत्॥१७॥ इति प्रणवकवचं समाप्तं॥ अथातः संप्रवक्ष्यामि
प्रणवब्रह्मणो द्विजोः॥ हृदयं सर्ववेदानां सारभूतं भवापहं॥१॥

ॐकारार्थविशेषेणयत्रशास्त्रोभिवीक्षितुं॥अकारस्यउकारस्यमकारस्यसबिंदुकः॥२॥
नादःकलाशक्तिरर्धमात्राशांतेनवांशकः॥तेषामर्थंप्रवक्ष्यामिपार्थक्येनस्फुचिवृ
ताः॥३॥प्रपंचोजायतेयस्माच्चराचरविभागतः॥वर्णाश्रमादिभेदेनपशुपक्षि
मृगादिकः॥४॥रज्वाद्यविवसर्पादिरविद्याहैकोमषा॥मरौमरीचिकानीरंयथैवंजा उ४
यतेजगत्॥५॥इत्याहप्रथमस्तत्रप्रपंचोनचवास्तवः॥यावद्बाध्यंप्रमाणेन
सर्पादेर्जीवनंयथा॥६॥एवंजीवतिविश्वंचद्दृष्टामोहंयचक्षणं॥इत्याहतत्
द्वितीयोऽपिजीवनेनचवास्तवं॥७॥अयसःसन्निधानेनतन्मणेश्चलनंयथा॥
तथाविद्यापिचलतिजगद्धेतुत्वकारणं॥८॥निश्चलेनिर्विकारेचयथासंसारइ सा
प्यते॥इत्याहतत्तृतीयोऽपिअविद्यानचवास्तवी॥९॥ब्रह्मबिंबात्मकंसत्यंजगं
नेतरदीदृशं॥अधिष्ठानमबाध्यंस्यादधिष्ठेयस्यबाध्यता॥१०॥

रज्ज्वादेरिवसर्पादेःसर्वाधारपरेश्वरः॥इत्याहतच्चतुर्थोऽपिआधारत्वंनवास्तवं॥११
ब्रह्मसत्यंजगन्मिथ्याभेदोनब्रह्मजीवयोः॥ईश्वरःसंसरत्येवंजीवरूपेणजंतुषु
॥१२॥राजरूपेणभोगीचभिक्षुरूपेणभिक्षुकः॥इत्याहपंचमस्तत्रजीवरूपंनवास्त
वं॥१३॥चंद्रात्कलानभिद्यंतेसूर्यादिवचभानवः॥तथाजीवानभिद्यंतेब्रह्मणश्च
उपाधितः॥१४॥उपाधिनाशेनोपाधिस्तत्रयत्नस्ततोमहान्॥इत्याह[illegible]ष्ठस्तत्रा
पिजीवभेदोनवास्तवः॥१५॥स्थूलसूक्ष्मादिदेहेषुदग्धेषुज्ञानवन्हिना॥दग्धव
स्त्रमिवाभासाशक्तिरेकावशिष्यते॥१६॥तथाभासःप्रतीयेतयथापूर्वंचसंस्मृ
तिः॥इत्याहसप्तमीतत्रआभासोनचवास्तवः॥१७॥जीवन्मुक्तिदशांप्राप्यस्वानंद
मनुभूयच॥अर्द्धंचमीयतेयस्मात्ब्रह्माभिन्नंचसर्वदा॥१८॥अभावस्तस्यवि=
ज्ञानमहिम्नानुमितिर्भवेत्॥अर्द्धमात्रेतिसाप्रोक्ताप्राहैवंचाष्टमीयतः॥१९॥कर्मणा

8

न्यायतोभ्यासेस्थूलत्वसूक्ष्मादिदेहके ॥ नष्टे जन्मांतराभावे गुरुवेदांतमानतः ॥ २० ॥ व्य
तिरिक्तं जगत्स्वस्माद्यतो नास्ति ततः स्वयं ॥ शांतं निर्मलमाकाशं नित्यानंदं च सर्वगं
॥ २१ ॥ स्वे महिम्नि च संसिद्धः पर्यवस्यति केवलं ॥ नात्र भेदो न चाकारो न विकल्पो
न कल्पना ॥ २२ ॥ न किंचिन्नैव किंचिच्च सिद्धमद्वैतमुत्तमं ॥ इत्याह नवमस्तत्र त
तः श्रद्धस्व शौनक ॥ २३ ॥ शाखेदं गुरुमूलेन नानावेदांतसंग्रहं ॥ मुच्यते जन्म
पाशेन नेशेनात्रास्ति संशयः ॥ २४ ॥ शिखां सूत्रं च गायत्रीमहं दारान्कुमार
कान् ॥ परित्यज्य जवं खेतं प्रणवं सांगमुत्तमं ॥ २५ ॥ ॐकारं हृदयं गोप्यं रहस्ये
वं शंभुरब्रवीत् ॥ इति प्रणवहृदयं समाप्तं ॥ सूत उवाच ॥ सांगं प्रणवमाजप्य
पुरश्चर्यां ततश्चरेत् ॥ दशलक्षं जपः प्रोक्तस्तदर्द्धं होम उच्यते ॥ १ ॥ तर्पणाद्यतद
र्द्धं च सहस्रं द्विजभोजनं ॥ एवं कृत्वा स नियमं प्रणवात्मा प्रसीदति ॥ २ ॥ किमत्र

बहुनोक्तेन प्रणवेन तुल्या न हि ॥ गायंति श्रुतयः सर्वा जपंति मुनयस्तथा ॥ ३ ॥ वाच्यं
ब्रह्म परं वस्तु महिमा केन वर्ण्यते ॥ शुकादयोपि यं जप्त्वा मोक्षमापुर्निरत्ययं ॥ ४ ॥
लौकिकी वैदिकी वाक् व्याप्ता येन पत्ताशावत् ॥ इत्यवोचमहं सर्वं यत्पृष्टं मुनिस
त्तमैः ॥ ५ ॥ मुनय ऊचुः ॥ अहोभाग्यमहोभाग्यमहोफलमहोफलं ॥ पिता त्वं मुनि=
धौरेय सूत त्वन्मुखसागरात् ॥ ६ ॥ ॐकारकल्पमोक्तेयमणिं बध्वा वयं मुदा
॥ स्वकीयकंठदेशेषु धारयामः प्रसादतः ॥ ७ ॥ भासा तस्य तमो नष्टं हृदयस्थं
तपोप्यन ॥ इत्युक्त्वा मुनयः सर्वे नेमुः सूताख्यदेशिकं ॥ ८ ॥ पठंतु शृण्वंतु च वा
चयंतु लिखंतु गायंतु च बोधयंतु ॥ ॐकारकल्पं मुनिवृंदसेव्यं सूतोक्तमीशो
क्तमनिंदितं च ॥ ९ ॥ इति श्रीस्कंदपुराणे वैष्णवसंहितायां मंत्रप्रस्तावे प्रणवकल्पे
प्रथमोध्यायः ॥ १ ॥ श्रीपार्वतिशिवार्पणमस्तु ॥ ॐ नमः शिवाय नमः ॥ छ ॥

प्रणवः परमं ब्रह्म प्रणवः परमः शिवः॥ प्रणवः परमो विष्णुः प्रणवः सर्वदेवता॥१॥ मु
नयस्तु॥ सूत सूत महाप्राज्ञ व्यासशिष्य महामते॥ यस्य देवस्य नामानि लोकेषु मुनि
म २ सत्तम॥२॥ प्रथमं नाम्नि यस्मिंस्तु सर्वदेवोपि पूज्यते॥ सर्वदैवतत्वंदानां पूजनेया=
नि नो वद॥३॥ साधारण्येन सर्वेषां लोकानुग्रहकांक्षया॥ सूत उवाच॥ नामानि
यानि लोकेषु प्रणवस्य मुनीश्वरैः॥४॥ कीर्त्यंते नामभिस्तैस्तु सर्वदैवतपूज
नं॥ सर्वदेवात्मको यस्मात् प्रणवः परिकीर्तितः॥५॥ अस्य श्रीप्रणवाष्टोत्तरश
तनामस्तोत्रमहामंत्रस्य ब्रह्मा ऋषिः॥ परमात्मा देवता॥ अनुष्टुप् छंदः॥ अं बी
जं॥ उं शक्तिः॥ मं कीलकं मोक्षार्थे जपे विनियोगः॥ न्यासपूर्वकं॥ ध्यानं॥ ॐ
कारं प्रणवात्मबोधविलसत्प्राप्यं चिदानंददं॥ सत्यं ज्ञानमनंतमूर्तिममलं
सिद्धात्मकं सर्वगं॥ प्रसंचं पुरुषोत्तमाद्भवने व्योमापरोमावलि॥ वाणील

क्षितजगज्जनौकुशलया मोर्यासमेतं भजे॥१॥ एवं ध्यात्वा ततो भक्त्या नाम्नामष्टो
त्तरं शतं॥ प्रणवस्य जपेद्धि प्राः शुचिर्भूत्वा समाहितः॥२॥ ॐकारस्तारकं सू
क्ष्मं प्रणवः सर्वगोचरः॥ दिव्यमेकाक्षरं शुभ्रं शुद्धं निर्मलमव्ययं॥३॥ सत्यो
निरसयो देवो विश्वव्यापी प्रपंचगः॥ विष्णुर्ब्रह्मा शिवो धाता विश्वकर्ता ज
गद्गुरुः॥४॥ स्त्रष्टा पालयिता गोप्ता वेदकृल्लोगमाकृतिः॥ वेदांतवेद्यो निल
मं दैवतं भवनांतकं॥५॥ अकारादिक्षकारांतमातृकावर्णवाचकः॥ आलोच
नतपसिद्धजगदुत्पत्तिकारणं॥६॥ इनपावकवातेंदुमरुत्स्थावनकारणं
ईश्वरब्रह्मविष्णूनां रजःसत्वतमोभिदा॥७॥ उमावाणीविष्णुपत्नीशक्ति
क २ रूपेण संस्थितः॥ घुरुमस्तकवर्णादिनानांगविकल्पस्तथा॥८॥ ऋक्षाप्रभृ
तिरोगाणामालयानालयाश्रिचः॥ ऋषिवृंदसहस्राणां ज्ञानमोक्षप्रदायकः॥९

रूक्षाविदूरप्रज्ञानसंपन्नस्यापवर्गदः॥ तुलतुंपकलोपन्यत्रितयप्रतिपादकः॥१०॥ एलादि
वासनायुक्तपानीयोत्थानलालसः॥ ऐश्वर्याष्टकभूयिष्ठसिद्धपुरुषशोवितः॥११॥ ॐमा
दिनिखिलाम्नायमूर्द्धन्याम्नायबोधितः॥ औन्नत्यगर्वसन्नद्धदैतेयकुलघातकः॥१२॥
अज्ञानतिमिरापुष्टजगदाभासदीपकः॥ अः कंजजहरींद्रादिसर्वदैवतकारणं॥१३॥
कार्यकारणसंघातदेहावासमनोरथः॥ खादिभूतादिभूतास्वागम्यागम्यविचक्षणः॥१४
घर्मरस्मिप्रभाकर्ताबहिर्मुखपराङ्मुखः॥ चराचरस्वरूपी च घोतघोषादिदूरगः॥१५॥
जपसाहस्रजप्यश्च सडिलिप्रतिपादितः॥ सर्वज्ञोमितविज्ञेयो टंकवास्यविसाधितः॥१६
निष्ठुरावलिसंपत्क्रोडंभेतरविशोषितः॥ ठकौ निनादसंपन्नः प्राणित्राणपरायणः॥१७॥
तरुणारुणसंकाशजटामंडलमंडितः॥ स्थाणुः कूटस्थलक्ष्माच दानादानविचक्षणः॥१८॥
धनाधिपसमाराध्यो नक्षत्रोडुपमंडनः॥ पूज्यपूजकपूजाच फलरूपीफलासनः॥१९॥
बिंबिनीशातसंपूज्यो भयाभयासुकोविदः॥ मर्यादास्थापनोध्यक्षो पायजूक्राभिवोधितः॥२

रंभावनविहारीचलावण्यकमनीयदः॥ वेदारुवंदनीयश्च शंकरोलोकवासिनां
॥२१॥ षडाननजनोहेतुः संकल्पितपदार्थदः॥ सर्वात्मा सर्वदः सर्वः सर्वसाक्षी
च सर्वदः॥२२॥ सर्वकर्ता सर्वभोक्ता सर्वेश्वरनियामकः॥ सर्वभूतहदावासः
व४ सर्वर्तुस्वरूपकः॥२३॥ हव्यकव्यादिभोक्ता च रूपालुजनशेखरः॥ क्षितिनिरा
ग्निपवनखसोमरविपुंरात्तिः॥२४॥ शब्दब्रह्म परब्रह्म कार्यब्रह्म च ब्रह्म च॥ सू
तउवाच॥ इतीदं प्रणवस्यास्य नाम्नामष्टोत्तरं शतं॥ सर्वदैवतपूजायै निर्मि
तं वेदसंमतं॥२५॥ यः पठेत्सततं जंतुर्मुच्यते सर्वपातकैः॥ यतिभिः पठनीयं
च नियमेन त्रिकालतः॥२६॥ सर्ववेदफलं प्रेति ब्रह्मचारी पठेद्यदि॥ वनस्थता
पसीसिद्धिं गृहस्थकर्मणां फलं॥२७॥ भिसंनिर्दुखमानंदं सन्यासी लभते तदा
यस्मिन्देवे यस्य भक्तिः तेन नामभिरेतकैः॥२८॥ चतुर्थीनमॐकारपूर्वैर्देवः

७

सपूज्यतां॥ नामान्येतानि पार्वत्या इत्येवं शंभुरब्रवीत्॥२९॥ इति प्रणवाष्टोत्तरनामसमाप्त॥छ
सूत उवाच॥ अथातः संप्रवक्ष्यामि रहस्यं देवदुर्लभं॥ सांगोपांगां नामानां च पठने तुल्यदं
फलं॥१॥ ॐकारः प्रणवो नेतः सर्वव्यापी च तारकं॥ शुक्लं सूक्ष्मं वै ध्रुतं च परं ब्रह्म तथै
व च॥२॥ एकश्च एकरुद्रश्च ईशानो भगवांस्तथा॥ महेश्वरो महादेवः प्रसगोस्मात
थैव च॥३॥ षोडशैतानि नामानि प्रणवो ब्रह्मणो द्विजाः॥ मुमुक्षोर्मोक्षदानाय जन
गादाथर्वणी श्रुतिः॥४॥ यः पठेत्त्रिषु कालेषु श्लोका माहात्म्यमेषु सः॥ अपवर्गं शुभं
प्रैति जंतुस्तेनाक्तिवीक्षितः॥५॥ इति प्रणवषोडशनामसमाप्तं॥ पठंतु शृण्वंतु च
वाचयंतु लिखंतु गायंतु च बोधयंतु॥ ॐकारकल्पयवं दर्शयंस्सूतोत्क्रमी
श्लोक्रमं निर्दितं च॥१॥ इति श्रीस्कंदपुराणे वैष्णवसंहितायां मंत्रप्रस्तावे प्रणवक
ल्पे द्वितीयोध्यायः॥२॥ प्रणवः परमं ब्रह्म प्रणवः परमः शिवः॥ प्रणवः परमो विष्णुः
प्रणवः सर्वदेवताः॥१॥ सूत उवाच॥ अथातः संप्रवक्ष्यामि पंजरं वज्रपंजरं॥

प्रणवब्रह्मणो विप्राः पापघ्नं शंभुरब्रवीत्॥२॥ ॐकारः पातु तिष्ठंतं शयानं प्रणवोवतु॥ गच्छंतं पा
त्वनंतो मां भुंजानं परमेश्वरः॥३॥ सर्वव्यापि सर्वदिक्षु सर्वाण्यंगानि सर्वगः॥ सम्यक्कर्म सुमां
देवः सर्वशास्त्रेषु माध्यिकः॥४॥ निद्राणं पातु मां भद्रः करोतु शुभमव्ययं॥ पादादिमस्तकांतानि
रक्षत्वंगानि रक्षकः॥५॥ विनाशयेदहंकारं बुद्धिमासन्निचोदयेत्॥ करोतु निर्मलं चित्तं
निर्मलखादिचिंतितः॥६॥ दौर्जन्यं वर्जयेद्दूरं मयि सर्वावलंबनः॥ सुखीकरोतु मामात्मा पैशाच्या
दिभयंकरः॥७॥ संपन्नसंपद्दो दघाद्विपदो विनिवर्तयेत्॥ मूलाधारादिषट्चक्रं पातु षट्चक्रगो
चरः॥८॥ भवाब्धिपोतो मां तत्र पतंतमभिरक्षतु॥ यमभीतिकरस्तस्माद्व्यान्मामतिघोरतः
॥९॥ पुनर्जन्म निराकुर्यादानंदं संप्रयच्छतु॥ पापकर्मसु मां शुभ्रो विमुखं विदध्यातु च॥१०
संधिष्वोसंधि मां कर्त्तापायान्मर्मसु मर्मगः॥ निर्ममत्वं सदा दद्यात्प्रभवः सर्वगोचरः॥११॥ ण 18
रात्रौ भयान्मंत्रराजो राजश्रीस्स्यादराजकः॥ पादाक्रांतान्वशीन्कुर्याच्छत्रुसंघभयंकरः॥१२
सर्ववश्यकरो ख्यार्यः सर्वदा मय्यतिष्ठतु॥ सूत उवाच॥ इतीदं पंजरं दिव्यं प्रणवब्रह्मणो द्विजाः॥१३॥

येपठस्सततंजंतुर्महापातकनाशनं॥काव्यानांनाटकानांचदर्शनानांचसर्वशः॥१४॥अ
लंकारमतानांचपुराणानांचसर्वशः॥वेदांतानांचवेदानांगुरुशिक्षांविनास्वतः॥१५॥
ग्रंथजालस्यसर्वस्यसवेदार्थमहामतिः॥शास्त्वाग्रंथार्थमेतेषांव्याख्यायघ्रात्रकानू
प्रति॥१६॥अंतेवेदांतसिद्धांतब्रह्मप्राप्नोसनुत्तमं॥ॐकारपंजरंगौर्याईस्येवंशंभु
रब्रवीत्॥१७॥इतिप्रणवपंजरसंपूर्णं॥सूतउवाच॥अथातःसंप्रवक्ष्यामिप्रवब्र
ह्मणोद्विजाः॥मालामंत्रंपुराशंभुर्यथाप्रोवाचपार्वती॥१॥ॐनमोभगवतेॐका
रायनिखिलवेदविदितायवेदस्वरूपिणेअखिलवाग्रूपिणेवागभिन्नप्रपंचरूपा
यपरब्रह्मणेकरुणाकरविग्रहायशब्दब्रह्मणेप्रतीचेपराचेसंसारपारावारतारका
यसकलकर्त्रेसकलभोक्त्रेसुरासुरस्वरूपायचराचरकलेवरायासंतपुरुषार्था
यसमस्तमुनिप्राप्यायप्रणवायसर्वभूतहृदयाय॥अरूपिणेअदेहायाऽद्वैतात्मने

भोभोनित्यशुद्धबुद्धमुक्तस्वरूपप्रभेदबुद्धिप्रदायिनींग्रहणाग्रहणरूपिणींसकार्यांसवि
लासिनींमहामायांविनाशयविनाशयकामक्रोधलोभादिशत्रून्मारयमारयशो
मदमादिसच्चिवान्संयोजयसंयोजयसुधर्मिणींसुरक्षिणींमाहोजायांमोक्षलक्ष्मीं
विवाहयविवाहयअपवर्गसाम्राज्येमामभिषेच्ययोभिषेचय॥स्वरूपंप्रकटयप्र
शा॥५ कटयजरामरणादिपिंचानुद्घाटयोद्घाटयशब्दादिदरिद्रकंपंनिवारयनिवा
रय॥मातृयोनियंत्रपीडनंनिवर्तयनिवर्तय॥महाभावैकगम्यनिरुपद्रवनिरति
शयैश्वर्यबहुभयसंरक्षकसांतंसलक्षणंसांगोपांगंसोपनिषत्कंसरहस्यवेदंबो
धयबोधयमूर्तित्रयमूर्तिरहितशक्तित्रयशक्तिरहितआशापाशंछिंधिछिं
धित्रिलोचनस्यापिव्यामोहैकनिदानंभगवंतंमकरध्वजंभिंधिभिंधि॥चतु
र्दशभुवनात्मकंनिःशीमदर्शनदर्शीदृश्यमानचतुःषष्ठीकलापराङ्मुखनिखि

लमंत्रयंत्रतंत्रप्रवर्तकमात्‌कावर्णस्वरूपकलिमलप्रध्वंसीन्‌कालभयपरावर्तविष
यविपिनेपतलंमार्गादर्शिनंमार्गमाणंत्रालारमाक्रोशंतंस्तुतघ्राव्याघ्राभिःपेपीयमा
नमार्तमुमुक्षुंमामुद्धरोद्धरआसन्नप्रत्यक्शब्दवाच्यनिरूपमवैभवनिसोसव
अतीतद्वंद्वसुदुःखमूढजनदुःखप्रदभक्तजनकल्पद्रुमउपनिषदेकवेद्यसम
स्तवेदवंदिस्तुसब्रह्मादिसमाराध्यस्वात्मानंमांप्रापयस्वाहा॥सूतउवाच॥ॐका
रमालिकामंत्रमित्येवंशंभुरब्रवीत्॥स्मरंनेतन्मंत्रराजंमानिघ्नान्विमुच्यते॥१॥
इतिप्रणवमालामंत्रः॥ॐकारायविद्महेभवतारायधीमहि॥तन्नःप्रणवःप्रचो
दयात्॥इतिप्रणवगायत्री॥आदावकारमथउंप्रणवेनसंपिंबिंदुद्वयंतदनुवेष्ट
नलेखनंच॥हंकारतत्त्वपरवत्नमध्यःपृथिव्यांमंत्रनवस्यमुनिभिःपरिकीर्तितं
च॥१॥आदावकारंप्रणवेनसंपिंबिंदुद्वयंवेष्टनलेखनंच॥हंपरंवत्नलमध्यः
पृथिव्यांनवस्ययंत्रंपरिकीर्तितंच॥२॥सूतउवाच॥अथातःसंप्रवक्ष्यामि

स्तवराजंभयापहं॥प्रणवोब्रह्मणोविप्राःसाक्षान्मोक्षैकदायकं॥१॥उत्पत्तिस्थिति
भंगानिजायंतेजगतोयतः॥कार्यकारणकर्तारमोंकारंप्रणमाम्यहं॥२॥यो
गूढःसर्वभूतेषुसर्वभूतानिशास्तियः॥सर्वभूतस्वरूपीचॐकारंप्रणवा
म्यहं॥३॥विश्वंचराचरंसृष्ट्वातदंतःप्रविवेशयः॥तीलेषुतैलवत्सूक्ष्मःप्रण
वंप्रणमाम्यहं॥४॥अग्रेस्रष्टुःप्रपंचस्ययआस्तेवटबीजवत्॥स्रष्टारंचपुन
स्तस्यप्रणवंप्रणतोस्म्यहं॥५॥आब्रह्मस्तंभपर्यंतंभूतानिमाप्यजीववत्॥
यःसंसरतिभूतात्माप्रणवंप्रणतोस्म्यहं॥६॥ईश्वरब्रह्मविष्णूनांरजःसत्व
तमोगुणैः॥जनकंयत्परंवस्तुतारकंपातुवोसदा॥७॥वेदायस्यशिरःप्रो
क्तंशास्त्राण्यंगानियस्यच॥अंगानियस्यरोमाणिप्रणवःसविराजिते॥
पुराणंवाचकंयस्यस्थापकंधर्मशास्त्रकं॥इतिहासाश्चयस्यासाःप्रणवःसविरा
४ सर्वभूतहृदाकाशेकाशतेनिर्मलंपरं॥आकाशवत्सर्वगतं [illegible] ॥८॥२.२

12

वेदांता यस्य सर्वेपि शाशीरं श्रुतिमस्तकं ॥ वाग्जालं येन संव्याप्तं प्रणवः स विराजते
॥११॥ यज्ञोऽथ्या परमात्मानं विश्वामित्रादयो द्विजाः ॥ ब्राह्मण्यं लेभिरे ब्रह्मतारं दि
शालुनः फलं ॥१२॥ यं मत्वा विभुमीशानं दुःखं नोपैति साधकः ॥ सर्वदुःखौघ
संहर्त तारं दिशालुनः फलं ॥१३॥ आलोड्य सर्वशास्त्राणि निश्चिन्वंति मुनी
श्वराः ॥ ध्येयं तारकमित्येव तारकं तदुपेम्यहं ॥१४॥ वेदांतांभोजसंघानां भा
स्कराय प्रकाशिने ॥ निर्मलाय स्वरूपाय प्रणवायनमोनमः ॥१५॥ जीवा
जीवंति ये नैव न प्राणापानचेष्टया ॥ यमाश्रिताबुभौ तस्मै प्रणवायनमोनमः
॥१६॥ इतरस्य महामंत्रजालस्य फलदोपि यः ॥ सर्वमंत्रादिरूपाय प्रणवा
यनमोनमः ॥१७॥ प्रसन्नरूपाय दिव्याय रविमंडवासिने ॥ पुरुषेष्वभिवासा
यतारकायनमोनमः ॥१८॥ रज्जुर्यथा सर्परूपाभ्रांत्या भाति तथाप्ययं ॥

तारकं विश्वरूपेण भाति तस्मै नमोनमः ॥१९॥ विश्वस्य यं हि गायत्रीं स जंति
यतिपुंगवाः ॥ ॐकारायनमस्तस्मै ॐकारायनमोनमः ॥२०॥ आरोपयंति
वाच्यत्वेनो गायत्रीमद्विदृक्षया ॥ ॐकारायनमस्तस्मै ॐकारायनमोनमः ॥
२१॥ सूत उवाच ॥ स्तवराजं स्तवश्रेष्ठं शृण्वंति च पठंति च ॥ ये मानवा विपापा
स्ते यांति मुक्तिं सुदुर्लभां ॥२२॥ तस्मात् पठंतु सर्वेपि मोक्षवांछास्ति वो यदि ॥
स्तवराजं महादेव्या इत्येवं शंभुरब्रवीत् ॥२३॥ इति प्रणवकल्पे प्रणवस्तवरा
जः समाप्तः ॥ सूत उवाच ॥ ॐकाराक्षरमौलिकामनुमिमं वक्ष्यामि हे भूसुरा मो
क्षप्राप्तिकरं विशेषसुखदं नित्योत्सवं शाश्वतं ॥ पार्वत्यै सुरसेवितांघ्रिकमलः
शंभुर्यथाभाषते यो मंत्रो यतिपापनाशकरणोपायाय संनिर्मितः ॥१॥ ॐका
रं परमीशातत्वमखिलं वेदार्थतत्वप्रदं संसारांनिर्मलमव्ययं निरुपमं निःशेष

बीजाभिधं ॥ कार्यकारणमात्मनिष्ठमखिलं प्रोत्साहपूर्वं स्थलं भेदाभेदविवर्जितं श्रु-
तिशिरोमानं सदा ध्यायति ॥ २ ॥ अकारं करुणैकरूपममलं कारुण्यपूर्णेक्षणं
कर्पूरप्रचुरोरुचूर्णविमलं कर्पूरसंपादकं ॥ कामाकामविभीतिरूपिकासिं-
धूरसोद्धूलनेस्थिधूप्रधूतरसातलश्रामनिशं विष्णुं भजे सुंदरं ॥ ३ ॥ उंकारं पिशि-
ताशनाशीकरणं पीयूषपानारतं पीयूषप्रदवित्तनाथभजितं पीयूषकर्त्रं स्तवं
वेद्यं वेदविभागभूसुरवरप्रासंयुक्तं विद्धजनैः ॥ कार्याकार्यविचारदं विधिमहं
ब्रह्माणमाद्यं भजे ॥ ४ ॥ मंकारं मिलितामानमेयविधुरं मेयं सदा वेदिभिर्मंदोत्साह
मशेषजंतुरूपणं मंदोपकारापहं ॥ मंदामंदममत्सरंकरुणिकाकोलं शिवं शं-
करं कर्पूरस्फटिकाभकांतिकलितं कर्णोत्सवे शं भजे ॥ ५ ॥ बिंदुं बिंदुशालैकपार
मनिशं बिंदूद्भवं बिंदुगं बिंदुब्रह्मविशेषशोभनमतिव्यावृत्तदेहं प्रभुं ॥ निःसा

निःसविवेकवस्तुसहितं कर्मातिदूरस्थितं कार्योद्दर्तनकर्मदेशविवरं सौषुप्तिकं तं भ-
जे ॥ ६ ॥ नादं नादितशास्त्रवृंदधरणं शास्त्रैकवेद्यं प्रभुं ॥ शास्त्रावादिरूपाकृपादरसि-
क्तैः साक्षात्कृतं सर्वदा ॥ शास्त्रं शासनरूपदिव्यममलं प्रोत्साहनोद्दंडनं शाब्दब्र-
ह्मनिरस्तदोषममलं निःसीमसत्वे शं भजे ॥ ७ ॥ शक्तिं शक्तिनिरासमीशनिलयं
विश्वस्य निर्भेदकं विश्वोत्पत्तिविनाशजीवनकरं विश्वाश्रितं शाश्वतं ॥ विश्वत्रा-
णपरायणं विमलसन्मानुष्यचित्तस्थितं तत्त्वं निःस्वमशेषजंतु विबुधं चैतन्यका-
रमाद्यं भजे ॥ ८ ॥ अर्द्धमात्रामममात्रां च देवतां विजनोज्वलां ॥ ॐकाररूपिणीं
देवीं निःस्वं वंदे सुनिर्मलां ॥ ९ ॥ कलावंतं कलारूपं कालकालमकालकं ॥ क-
ल्पाकल्पविशेषं तं प्रणवं निर्मलं भजे ॥ १० ॥ शांतं निर्मलमाकाशमवाङ्मन-
सगोचरं ॥ स्वानुभूत्यैकवेद्यं [illegible] ॥ ११ ॥ सूत उवाच ॥

ॐकाराक्षरमालिकामंत्रं यः पठते यतिः॥ ऐदंसारस्वतं प्राप्य शाश्वतं पदमश्नुते॥१२॥
इति प्रणवाक्षरमालामंत्रः॥ सूत उवाच॥ अथातः संप्रवक्ष्यामि प्रणवब्रह्मणो द्वि-
जाः॥ अनुस्मृतिं मोक्षदात्रीं स्मृत्वा यां न पुनर्जनिं॥१॥ अग्रे सृष्टेः प्रपंचस्य
य आस्ते वटबीजवत्॥ सर्वभूतमयो दिव्यः प्रणवं संस्मरे यतिः॥२॥ य-
थांकुरहेतुर्वै प्राविश्वस्यापि तथा नवः॥ आधारो यो विभिन्नस्तं प्रण-
वं संस्मरे यतिः॥३॥ यद्विवर्तः प्रपंचोयं येन जीवति सर्वतः॥ यज्ज्ञाना-
न्नाशमायाति प्रणवं संस्मरे यतिः॥४॥ उपादानं महानूदिव्योयमोहुः
मुंच्यमानसाः॥ निष्कलं विभुमात्मानं प्रणवं संस्मरे यतिः॥५॥ गायत्रीं
संपरित्यज्य यं जपंति यतीश्वराः॥ साक्षान्मोक्षस्वरूपं तं प्रणवं संस्म-

रे यतिः॥६॥ गायत्र्यादिक्षुद्रमंत्राः कलां नार्हंति षोडशीं॥ यत्प्रभावमहांबो-
संः धेः प्रणवं संस्मरे यतिः॥७॥ यस्माद्दृते न चेदं स्याद् ऋते रज्जुं यथा फणी॥ यस्य-
तैव जगत्सत्ता प्रणवं संस्मरे यतिः॥८॥ साक्षात्कृत्स्वंमात्मानं न पश्यंति य
यतीश्वराः॥ जीवभेदं विश्वभेदं प्रणवं संस्मरे यतिः॥९॥ अनादिप्राप्तक-
र्माणि शिखासूत्रादिकान्यपि॥ यस्मै त्यजंति सावित्रीं प्रणवं संस्मरे य-
तिः॥१०॥ यत्र प्रतिष्ठितो विप्राः सर्ववेदसमन्वयः॥ तात्पर्येण न चान्य-
त्र प्रणवं संस्मरे यतिः॥११॥ स्वस्वाभिमतमार्गेण यं वदंति विवादिनः॥
जगदादिमनादिं तं प्रणवं संस्मरे यतिः॥१२॥ वेदा वदंति ये नैक्यं यस्य जी-
वस्य नो भिदा॥ जीवो यो यत्परं ब्रह्म प्रणवं संस्मरे यतिः॥१३॥ श्रुतिस्मृति-
भ्यां विहितो यदैक्यज्ञानसिद्धये॥ गायत्र्यादिपरित्यागः प्रणवं संस्मरे यतिः॥१४

ब्रह्मविष्ण्वादिभेदेन योभातिजगतांपतिः॥ ब्रह्मादयोयं जपंति प्रणवं संस्मरेद्यतिः॥१५॥
सूतउवाच॥ यइमामनुसंधत्ते यतिर्नित्यमनुस्मृतिं॥ ऐंद्रसारस्वतं प्राप्य शाश्वतंफ
लमश्नुते॥१६॥ अनुस्मृतिंमहादेव्या इत्येवं शंभुरब्रवीत्॥ इतिप्रणवानुस्मृतिः॥छ
का ॐरजं जपूकानां जप्यान्यगानि सर्वशः॥ सूतेन सम्यगुक्तानि ईश्वरेणैव पार्वती॥१॥
पार्वत्यंगानि सर्वाणि जप्यादिव्यानि सर्वशः॥ आनंदं परमं प्रापुर्मथैते मुनिसत्तमाः
॥२॥ श्रुत्वेदं मुनिशार्दूलाः संतोषमतुलं ययुः॥ केचित्स्तुतं प्रशंसंति चक्रुरालिंगनं
परे॥३॥ ये निरे केचिद्देतेन तुल्यो नास्तीति सर्वशः॥ केचिद्धासस्यमहास्यं मिदमि
त्याहरादरात्॥४॥ अन्येप्योंकाररूपेण निश्चिन्वंति स्म सूतकं॥ पठंतु श्रृण्वंतु च
वाचयंतु लिखंतु गायंतु च बोधयंतु॥ ॐकारकल्पं यतिवृंदसेव्यं सूतोक्तमीशोक्त
मनिंदितं च॥५॥ इति स्कंदपुराणे वैष्णवसंहितायां मंत्रप्रस्तावे प्रणवकल्पे तृतीयोध्या
यः॥३॥ प्रणवः परमंब्रह्म प्रणवः परमः शिवः॥ प्रणवः परमो विष्णुः प्रणवः सर्वदेवताः॥१॥

सूतयूचुः॥ पुरश्चर्यां चरित्वा तु पार्वती जगन्नायिका॥ अलभीष्टमहानंदमित्यवोच
द्भवांकिल॥२॥ कथं प्राप महानंदं पार्वती तां विधां वद॥ आनंदं कीदृशं प्राप कथं प्रा
प्नोति वा वद॥३॥ इत्युक्तो मुनिभिः सूतस्तं प्रकारं अभाषत॥ सूतउवाच॥ अथातः सं
प्रवक्ष्यामि यतीनां मुक्तिदायिनीं॥४॥ ॐकारगीतायागीता गीता मुक्तिं प्रयच्छति॥ जे
गीयतां गीयमाना गायतस्त्रायते सदा॥५॥ कदाचिदीश्वरी मोशविजने शुचिबुद्धि
दे॥ गुहायां हैमवत्यां च ध्यायंती ब्रह्मतारकं॥६॥ निर्गुणं स्वात्मरूपेण तिष्ठति स्म स
दा शुचिः॥ ध्यायं ध्यायं संस्थितायाः प्रणवं ध्यानचेतसः॥७॥ विश्वं ब्रह्ममयं
सर्वमभिन्नं निर्विभेदकं॥ पश्यंत्यास्तत्र पार्वत्या आविरासमहन्महः॥८॥ सर्व
त्रगं सर्वरूपं निर्मलं निरुपद्रवं॥ सत्यं ज्ञानमनंतं च मनोवाचामगोचरं॥९॥ अद्वै
तं मोक्षरूपं च प्रसन्नरूपमनेकं॥ [illegible] जीवेशादिभिदापहं॥१०॥ प्र
पंचे दृश्यमाना ये पदार्था मानवादयः॥ सुरासुरप्रभृतयो ये ते दर्शनगोचराः॥११॥

१८

तस्यांदशायांतद्ध्यानाद्दृष्टिपथमागता॥ यथापट्टंतिनानार्थंनविद्यात्तुसचेत
सः॥१२॥ जीवोऽयमीश्वरोऽप्यन्यदस्येवंध्वस्तदृष्टयः॥ विदेहमुक्तिवेलायांजीवन्मुक्तौ
चतापसाः॥१३॥ ध्यानेकालेस्थितिर्यादृक्तादृगेवस्थितिःसदा॥ भर्तृभार्यादिसंभे
दगुरुशिष्यादिभिन्नता॥१४॥ वेदशास्त्रादिभेदोवातदानोभातिकिंचन॥ एतन्निदान
मज्ञानंयतोनष्टंविवेकतः॥१५॥ रज्ज्वारोपितोयद्वद्रज्जुनाशेयथाफणी॥ एत
स्मिन्नेवकालेतुप्रादुरासत्सुचिश्रवाः॥१६॥ लोकोपकारकारायदिव्यावागशरी
रिणी॥ वागुवाच॥ भोभोदेविकृतार्थासिगुरुकारुण्यलेशतः॥१७॥ नष्टाज्ञानान
ष्टकार्यानष्टजीवादिभेदिमा॥ नष्टकामादिदौर्गुण्याअसित्वंपरमेश्वरी॥१८॥ मज्ज
पप्रभवादेवंप्रादुरासमहंमहः॥ एवंप्रभावोमज्जापात्तस्मान्मामेवसंजपेत्॥१९॥
यतीश्वराश्चगायत्रींसंध्याभेदावलंबनां॥ मामेवसर्वदाशुद्धाजपंसालोचमंतिच॥२०॥
मदर्थंचापिमामेवसर्वभेदविनाकृतं॥ गायत्रीमपिसावित्रींशिखांसूत्रंचकर्मच॥२१॥

सद्यःसंन्यस्यजप्योहंमोक्षवांछाभवेद्यदि॥ इदंकल्प्यंतुसर्वेषांगृहीणांब्रह्मचारि
णां॥२२॥ वनस्थानांयतीनांचपारायणफलंसमं॥ सकमंडलुदंडानांयतीनामेव
मज्जपः॥२३॥ कल्प्यंसाधारणंप्रोक्तंपुराणत्वेनहेतुना॥ सर्वंचमन्मयंदेवीविश्व
स्माच्चविलक्षणः॥२४॥ निर्गुणोनिर्विकारोहंस्वद्रूपःसर्वरूपवान्॥ मत्तोऽन्यन्नं
चयत्किंचित्सर्वंचमय्यविकल्पितं॥२५॥ अहमेवविलासेनबद्धोमुक्तश्चसर्व
गः॥ माययावीवस्वयंसर्वंसृष्ट्वातत्रप्रविश्यच॥२६॥ संसाराब्धिंभ्रमामीवगच्छा
मीवनमामिच॥ मूढानांचतथाभामिनगुर्वायत्तचेतसां॥२७॥ इदंभ्रांतंजगद्य
स्तुपश्यसेषसपश्यति॥ लोकभेदंसमुद्दिश्यवस्तुताप्रतिवस्तुता॥२८॥ देवीकेनोप
निषदिएवंसंवादकोमया॥ इंद्रादिनापुराज्ञातोगर्वनिर्वापणायवै॥२९॥ पार
मार्थिकदृष्ट्यौतुनैवंपर्युपपद्यते॥ एतादृशंस्वरूपंत्वंलप्स्यसेदेहपाततः
॥३०॥ एवमेवहियोवेदलभतेसोऽपिमांशिवे॥ तस्मात्सर्वप्रयत्नेनमदर्थंप्रवि

ष्टवीतध्यापि मन्वीत निदिध्यासनमाचरेत्॥ मदर्थो यत्र विस्तारो वर्णितो बुधसत्तमैः॥३२॥ सद्भावो यस्य पुंसोऽस्ति तस्यावस्थात्रयं भवेत्॥ जीवन्मुक्तिर्ध्यानकाले देहपाते विशेषतः॥३३॥ न तस्य जन्म दुःखं वा खेदो वा संभवस्तमे॥ मुह्यंति मूढाः सर्वत्र गुरुज्ञानस्वरूपपराङ्मुखाः॥३४॥ अन्यो जीवस्तथा ब्रह्म प्रपंचोऽन्य इतीश्वरि॥ नैवं मुह्यंति सच्छिष्या यतो ब्रह्माद्वयं स्मृतं॥३५॥ सर्वोपनिषदो देवि गुरुवाक्यं सतां वचः॥ स्वानुभूतिर्विचारश्च प्रमाणं यदि पार्वती॥३६॥ इत्युक्त्वा विररामासौ दिव्या वागशरीरिणी॥ सूत उवाच॥ गौरीदं वाक्यमाकर्ण्याश्चर्यं परमं ययौ॥ वृत्तांतमिममीशानी ज्ञापयामास शंकरं॥१॥ श्रुत्वा वाक्यं तथा शंभुः संतोषं परमं ययौ॥ निश्चयामासतुर्विप्राः तथेति गिरिजाशिवौ॥२॥ कुर्वाते प्रत्यहं ध्यानं प्रणवब्रह्मणः शिवौ॥ तस्माज्जपं तु चोंका

रं सांगं तु मुनिसत्तमाः॥३॥ त्रिकरण्या च गायत्रीं पित्रा मूढेन देशितां॥ यस्त्यक्त्वा सर्वं गुरुणादिष्टं तारं जपंतु च॥४॥ यतिर्गायत्रीं जपति तावद्बाधास्तारजापकाः॥ मंत्रजाप्यश्च नार्यश्च सर्वे निरयगामिनः॥५॥ इत्यवोचमहं गीतां दिव्यां प्रणवनामिनीं॥ यो गायति सदा शुद्धः सोंऽते मुक्तिं च विंदति॥६॥ पठंतु शृण्वंतु च वाचयंतु लिखंतु गायंतु च बोधयंतु॥ ॐकारकल्पं यतिवृंदसेव्यं सूतोक्तमीशोक्तमनिंदितं च॥७॥ इति श्रीस्कंदपुराणे प्रणवकल्पे चतुर्थोऽध्यायः॥४॥ प्रणवः परमं ब्रह्म प्रणवः परमः शिवः॥ प्रणवः परमो विष्णुः प्रणवः सर्वदेवताः॥१॥ मुनय ऊचुः॥ सूत सूत महाप्राज्ञ द्वैपायनकृपालय॥ सत्यवत्याः सुतात्सर्वं ज्ञातं लौकिकवैदिकं॥२॥ अस्माकं कृपया पूर्वमोंकारकवचं श्रुतं॥ ॐकारहृदयं पुण्यमोंकारांगस्तुतिस्तथा॥३॥ ॐ[illegible] ॐकार

18

प्र०क०

पंजरादीनि सर्वाण्युक्तानि भो त्वया॥४॥ श्रुत्वैतानि मुनिश्रेष्ठैर्लब्धं कार्तार्थ्यमुत्तमं
वाच्यं श्राव्यं पुनः किंचिदस्ति नो वेद तत्प्रभो॥५॥ यच्छ्रुत्वा मुनिधौरेय श्राव्यं लोके
न विद्यते॥ ॐकारनाम्नां साहस्रं भुक्तिमुक्तिफलप्रदं॥६॥ नानारोगहरं नृ-
णां नानाकामार्थदायकं॥ नानाश्रमफलाकारं नानास्तोत्रफलप्रदं॥७॥ अस्मभ्यं
वद लोकानां हितं कर्तुं महामते॥ यच्छ्रुत्वा पठित्वा वा पुनर्जन्म न विद्यते॥८॥ सूत उ-
वाच॥ भो भो हे मुनयः श्रेष्ठाः साधु पृष्टं महात्मभिः॥ यथा शंभुः पुरा गौर्या मेघगं-
न भीरया गिरा॥९॥ प्रश्नेनानेन तुल्यान पृष्टं केनचित्पुरा॥ अतो वक्ष्यामि युष्म-
भ्यं यतो मुक्तिर्भवेद्ध्रुवं॥१०॥ इत्युक्त्वा वकुमारेषे सूतः पौराणिकः प्रभुः॥ ॐ
अस्य श्रीप्रणवदिव्यसहस्रनामस्तोत्रमहामंत्रस्य। परब्रह्म ऋषिः। अनुष्टुप् छंदः॥
परमात्मा देवता। अकारो बीजं। उकारः शक्तिः। मकारः कीलकं। मोक्षार्थे जपे विनि-
योगः॥ अकारोकारमकारैर्न्यासं कुर्यात्करादिषु। अष्टोत्तरनाम वक्ष्ये॥ अथ

ध्यानं॥ ॐकारं निगमैकवेद्यमनिशं वेदांततत्त्वास्पदं चोत्पत्तिस्थितिनाशहेतुमम-
लं विश्वस्य विश्वात्मकं॥ विश्वत्राणपरायणं श्रुतिशतैः संप्रोच्यमानप्रभुं सत्यं
ज्ञानमनंतमूर्त्तिममलं शुद्धात्मकं तं भजे॥१॥ एवं न्यस्य ततो ध्यात्वा नामानि प्रज-
पेत्सुधीः॥ ॐकारस्तारकः सूक्ष्मः प्रणवः सर्वगोचरः॥२॥ क्षरमेकोक्षरं क्षारं स्थि-
तिरुत्पत्तिहेतुकः॥ नित्यो निरेयः संशुद्धो निर्मलात्मा निरावृतिः॥३॥ निराधारः
सदानंदः शाश्वतः परतः परः॥ [illegible] अकारात्मा मकारात्मा बिंदुरूपी कलाध-
रः॥४॥ उकारात्मा महावेद्यो महापातकनाशनः॥ [redacted] इज्यः
परतरो वेद्यो वेदवेद्यो जगद्गुरुः॥५॥ [redacted] वेदरहृद्देववे-
त्ता च वेदांतार्थस्वरूपगः॥ वेदांतवेद्यो न तुल्यः कंजजन्मा कमालतिः॥
६॥ खरूपी खगवाही च खगगः खगतरः खगः॥ खाधः खभूतः खगतः खगमः ख-
गनायकः॥७॥ खवरमः खजलः खालः खगवाहः खगेश्वरः॥ गंतागमयितागम्यो गच्छन्

गतिकरो गतिः ॥८॥ मनस्सो गतिहंता च गम्यानामुत्तमोत्तमः ॥ घंटानिनादो घंटेयो घंटेयपर-
नंदनः ॥९॥ घंटानादकरो कघंटानादवानूनादवानूघुणः ॥ घस्त्रो घस्मिलचिद्रूपो घनानां
जलदायकः ॥१०॥ चंपापूज्यश्छिदानेदश्छिदो छिरलरंच्छितिः ॥ च्छिलिदश्छितिगं-
ताच चर्मवान्चेलनारूपी ॥११॥ चंचलश्चालकश्चा ल्यः छायावान्छादनात्मकः
छाया छाया प्रतिछाया जंजपूको महामतिः ॥१२॥ जलगर्भो जलाकारो जाली जा-
लविनायकः ॥ झटितिप्रतिध्वौ रेयो झंझामारुतसेवितः ॥१३॥ टंकेच टंककर्तीचिटं-
ककार्यवश्यानुगः ॥ ठिठुलो निष्ठुरस्त्वष्टः कमठः पृष्ठगोचरः ॥१४॥ काठिन्यात्माकूठो-
रात्माकूठकोटीरगोचरः ॥ डमरुध्वानसानंदो डिंभिकानां परासुखः ॥१५॥ डंसेत-
रतमाराध्यो डिंभिकानां विडंबनः ॥ ढक्काकलकलध्वानो णिमाणुलरसुंदरः ॥१६॥
तारतम्यफलेतल्पं तल्पशायी वितारकः ॥ तर्तव्यतारणं तारं तारकानाथभूषणः
॥१७॥ हिरण्यबाहुः सेनानीर्दिशानांच दिशांपतिः ॥ पीतवर्णो महावक्षो हरिकेशोपवीतः

स्तायूनामगणीः श्रीमान्निचेरुः परिचारिकः ॥ बिल्मी च कवची वर्मी मन्त्रेभगवरूथवा-
न् ॥१९॥ वंचकः परिवंचीच कूमरिः कुंभकारकः ॥ पक्षिपुंजोपजीवीच मृगयुः श्वनको-
नयः ॥२०॥ भवरूपापमहाह्नापिर्दरिद्रो नीललोहितः ॥ मीढ्वान्मीढुष्टमः शंभुः शत्रु-
घ्नाथीचबभ्लुशः ॥२१॥ लोकादिरसकः कर्त्तारवल्यउर्वर्यएवच ॥ भलाचेनाथसूचु-
श्चहेतिसाहस्रसंयुतः ॥२२॥ स्त्रकाहस्तो महापापः शरव्यायुतमंडनः ॥ शर्वोऽपहत्नु-
कामश्च जरित्रस्थः प्रतारकः ॥२३॥ अन्नबाणो बातबाणो वर्षबाणः करांबुजः ॥ दश
प्राच्यादिवंघश्च सस्पिंजरस्तु लेवरः ॥२४॥ जपैकशीलः संजप्यः समजंगिपुः सपी-
लकः ॥ एमादिकुशलो गोरो दिवारात्रैकदृष्टिदः ॥२५॥ पंचाविश्चत्र्यविश्चाप्यदित्य-
वाट्तुर्यवाट् तथा ॥ पष्ठवाडूवेहतोनाथो धुमन्वाजादिदायकः ॥२६॥ आमीवत्कोवि-
च्चित्कोदेवानां हृदयांगगः ॥ आविर्हतश्च विक्षीणो लोप्यश्चोलप्यएवच ॥२७॥ ऊर-
माणः पर्णशाद्यः सूर्म्यकुर्व्योम्नि [illegible] रास्तो योराघोरतनु

कारपर्वतनाथश्च शिपिविष्टः पतिः पशोः ॥२९॥ अप्रगल्भः प्रगल्भश्च मल्लानां
नायकोत्तमः ॥ प्रहिलः प्रमत्तो दूतः क्षत्ता स्पंदनमध्यगः ॥३०॥ स्थपतिः क
कुभश्चैव वन्यकक्ष्यैः पतंजलिः ॥ सूतो हंसो निहंता च कपर्दी च पिनाकवान् ॥
३१॥ आयुधस्त्वायुधश्चैव कृत्तिवासा जितेंद्रियः ॥ यातुधानीनिहंता च कैला
से दक्षिणे स्थितः ॥३२॥ सुवर्णमुखरीतीरस्थो वृद्धाचलनिकेतगः ॥ मणिमुक्ता
दयो द्रासीकाद्यैकाद्यौ महाद्रिध्वजकुः ॥३३॥ हृदय्यश्च निवेष्यश्च हरित्सुष्प्यश्च रव
च ॥ सिकत्यश्च प्रवाह्यश्च भवरुद्रादिनामवान् ॥३४॥ भीमोऽभीमोऽपरिक्रांतो
विक्रांतः सपराक्रमः ॥ शरः शरनिहंता च मन्युमान्मन्युनाशनः ॥३५॥ भामितो
भामवान्भाम उक्षा चोक्षितरक्षकः ॥ हविष्मान्मघवा चैव मखानां फलदायकः
॥३६॥ अघघ्नो दोषजालघ्नो व्याध्यामयविनाशनः ॥ सूक्ष्मरूपोऽसूक्ष्मरूपो जगन्ना

थोप्रिवाचकः ॥३७॥ श्वातश्च श्वानाथश्च श्वासो श्वासादिदूरगः ॥ ब्रह्मदत्तश्चेकिता
नो देवदत्तोऽतिसंमतः ॥३८॥ श्रमणोऽश्रमणः पुण्य आश्रमाणां फलप्रदः ॥ कलः क
लयिता कालः कालकालः कलाधरः ॥३९॥ धनुष्मान्निषुमांश्चैव धन्वा विश्वाततता
वनः ॥ सस्यादिनिलयाधारः काकुरः ककुवाग्बलः ॥४०॥ राकाकालविधाता च विश्व
रक्षैकदक्षिणः ॥ अग्रेवधो दूरवध्यः शंतमश्च मयस्करः ॥४१॥ कालभारः काल
कर्ता ऋचां भावैकवेदनः ॥ यजुषां सर्वमध्यस्थः साम्नां सारैकगोचरः ॥४२॥ अं
गिराश्च तथा पूर्वावेधो ब्राह्मणमध्यगः ॥ उक्तानां च गतिः पुण्यः पुण्यापुण्यह
रो हरः ॥४३॥ उक्थमुक्थकरश्चोक्थी ब्रह्मक्षत्रे विडंतिमः ॥ धर्मो धर्महरो धर्मो
धर्मी धर्मपरायणः ॥४४॥ नियोनियो स्मरः शांतो वेगवान मिताशनः ॥ पुण्यवा
न् पुण्यकृत्पूतः पुरुहूतः पुरुष्टुतः ॥४५॥ अर्चिष्मानर्चितः कुंभः कीर्तिमान् कीर्ति
दो कलः ॥ स्वाहाकारो वषट्कारो हंतकारः स्वधाधिपः ॥४६॥ भूतवद्भूतभद्भ

४

तीर्द्धिबर्हा दुर्दनाशनः॥मुनिः पिता विराड्वीरो ब्रह्मा देवो दिनेश्वरः॥४७॥ तारकातार
केतूर्णं तिग्मरश्मिस्त्रिनेत्रवान्॥तुल्यं तुल्यहरो तुल्यं त्रिलोकीनायकस्तुतिः॥४८॥
तन्तीतार्यं त्रिभुवनी तीर्णंतीरं च तीरणीः॥सतीरस्तीरगस्तीव्र तीक्ष्णरूपी च तीव्रि
मा॥४९॥अर्थोनर्थोसिमर्थश्च स्तीर्थरूपी च तीर्थकः॥दायादो देवदाता च दायदः
परिपूजितः॥५०॥दायभुक् दायहर्ता च दामोदरगुणाबुधिः॥धनं धनद विश्रां
तो धनेदो धननाशकः॥५१॥निष्ठुरो नारशायी च नेतानायकउत्तमः॥नैकोनैक
चरो नाथो नारायणस्समप्रभुः॥५२॥नूपुरं नूपुरीनेयं नरनारायणोत्तमो॥पा
तालं पायिता पेयं पिबन्सागरपूर्णिमा॥५३॥पूर्वं पूर्णं पूर्णिमा च पुण्यमानस
लालितः॥पेपीयमानः पापघ्नः पंचयज्ञमयः पुरुः॥५४॥परमात्मा परेशानः
पावनात्मा परात्परः॥पंचबुद्धिमयः पंचप्रयोजादिमयः परः॥५५॥प्राण
श्च प्राणहा प्राणः प्राणहृत्प्राणचेष्टितः॥पंचभूतमयः पंचकरणाश्चो

परं हितः॥५६॥प्रेयान् प्रेयेतमः प्रेयः प्रेयसी प्रेयसीरतः॥पुरुषार्थः पु
ण्यसीलः पुरुषः पुरुषोत्तमः॥५७॥फलं फलस्य दाता च फलानामुत्तमो
त्तमः॥बिंबं बिंबात्मकं बिंबी बिंबिनीमानसोल्लसः॥५८॥बधिरोऽबधिरो
बालो बाल्यावस्थो बलप्रियः॥एकोऽद्वयी दशबलः पंचकोचाष्टकीपु
मान्॥५९॥भगश्च भगवान् भल्लुर्भाग्यं भल्लश्च मंडितः॥भवांश्च भवदायादो
भवो भर्तुर्भूमिदैवतम्॥६०॥भवानी॰भवरहबोभूतनिःस्यंप्रचारितः॥भा
षा भाषयिता भाष्यं भावरूढाश्च वित्तमः॥६१॥मंदो मलिनविच्छेत्ता मा
ली मालामरुत्कृतः॥मूर्तिमान् पुनर्वेधो मुनिवृंदो मुनीश्वरः॥६२॥म
रुर्मरुध्वजं मेरुः मरुद्गणनिषेवितः॥मर्यादास्थापनाध्यक्षो मर्यादाप्र
तिभंजनः॥६३॥मान्यो [illegible] मानगोचरः॥यास्को युवा

यौवनाढ्यो युवतीभिः पुरस्कृतः ॥६४॥ वामनीर्भामनीश्चैव भारूपो भास्करद्यु-
तिः ॥ संयद्धामो महावामः सिद्धिः संसिद्धिकल्पनः ॥६५॥ सिद्धसंकल्प एना-
द्यस्त्वनूचानो महामनाः ॥ वामदेवो वसिष्ठश्च ज्येष्ठः श्रेष्ठो महेश्वरः ॥६६
मंत्रीच वाग्मिजो दिव्यो भुवंतिवारिवस्कृतः ॥ कार्यकारणसंघातो नि-
दानं मूलकारणं ॥६७॥ अधिष्ठानं विश्रमाद्योऽविवर्त्तो ब्रह्मकेवलं ॥ अ-
णिमा महिमा वेत्ता प्रथिमाथुंपूलं पृथुः ॥६८॥ जीवो जैवः प्राणधर्त्ता
करणो मैत्रको बुधः ॥ ऋचां जाल मृचां कर्त्ता ऋग्मुखो रश्मिमंडलः
॥६९॥ रूढो रूढी रुढिनिष्ठो रुरुक्ष्मरूपवर्जितः ॥ स्वरो हलश्च हः
स्पर्श ल्यश्चैवोष्मा तथांतरः ॥७०॥ विशोकश्च विमोहश्च यः स एव जगन्म-
यः ॥ येकोनेकः परः पीज्यः ज्ञाता ज्ञेयं च ज्ञातं ब्रहन् ॥७१॥ सहस्रार्द्धः सह-

स्रंचदृग्गोपश्च पंकजं ॥ पद्मनाभः सुराध्यक्षः पद्मगर्भः प्रतापवा-
न् ॥७२॥ वासुदेवो जगन्मूर्त्तिः संधाता धातुरुत्तमः ॥ रहस्यं परमं गो-
प्यं गुह्यमद्भुतविस्मितं ॥७३॥ आश्चर्यमतिगंभीरं जगद्बुद्बुदसागरः ॥
व संसारविषपीयूषं भवेवृश्चिकमांत्रिकः ॥७४॥ भवगर्त्तसमुद्धर्त्ता भवव्या-
घ्रवज्रांकुरः ॥ भवभ्रमहमहामंत्रो भवभूतविनाशनः ॥७५॥ पद्ममित्रं पप-
बंधुर्जगन्मित्रं जगद्गुरुः ॥ कविर्मनीषी परिभूर्याथातथ्यविधायकः ॥७६॥
दूरस्थोप्यंतिकस्थश्चस्थूलोकायं तथाव्रणं ॥ कौपीतकी तत्वकारो नाना-
ज्ञास्वाप्रवर्त्तकः ॥७७॥ उद्गीथं परमोद्गात्रं शास्त्रं स्तोमं मखेश्वरः ॥ अश्व-
मेधः क्रतुश्छायः क्रतुः क्रतुमयो क्रतुः ॥७८॥ पृषदाज्यं वसंताज्यं ग्रीष्म-
इध्मः शरद्धविः ॥ ब्रह्मतातो विराड्तातो मनुतातो जगत्ततः ॥७९॥ सर्व

तालः सर्वद्रष्टो जगद्द्रष्टो जगन्निधिः ॥ जग[illegible]दीप्चितरंगाणामाधारं
परमंपदं ॥८०॥ जगत्कल्लोलपाथोधिर्जगदंकुरकंदकः ॥ जगद्वल्लीमहाबी
जं जगत्केदारमुद्गरः ॥८१॥ सर्वोपनिषदां कंदं मूलकंदमुकुंदकः ॥ एका
म्रनायकः कांचीमान् जंबुकेशो महातरुः ॥८२॥ न्यग्रोधोदुंबरश्वत्थः कू
टस्थस्थाणुरद्भुतः ॥ अतिगंभीरमहिमा चित्रशक्ति विचित्रवान् ॥८३॥ वि
स्मितं चित्रवैचित्र्यो मायावी मायया वृतः ॥ कपिंजलः पिंजरश्च चि
त्रकूटो महारथः ॥८४॥ जगन्मयाय दिव्याय देवाय परमात्मने ॥ जगन्मा
याये जगते प्रतीचे ते नमो नमः ॥८५॥ जीवाय जीवरूपाय जीवकर्मै
कसाक्षिणे ॥ जीवाजीवप्रभिन्नाय प्रतीतेचे नमो नमः ॥८६॥ कालाय का
लकंठाय कालकंठाय तेजसे ॥ ओजसे भ्राजसे तस्मै यस्मै कस्मै नमो
नमः ॥८७॥ किरीटिने सुगादिने शांखिने चक्रिणे नमः ॥ शूलिने चंद्र

मूर्द्ध्ने च वृषाय वृषवाहिने ॥८८॥ हंसिने वेदिने तस्मै चतुर्वक्त्राय ब्रह्मणे ॥
नमोऽर्च्याय ब्राह्माय ब्रह्मणे परमेष्ठिने ॥८९॥ लक्ष्मीपते ह्रीपते त्वं पाहि
नः पुरुषोत्तम ॥ दिव्याय दिव्यपुरुष पावनायातिपावन ॥९०॥ रामाय रा
मदेहाय पावनाय पवित्रिणे ॥ सहस्रवक्त्रो भूयश्च वंदनं परमात्मने ॥९१॥ मंगलं ज
तां नाथ मननं विश्वपावक ॥ नाराधनं करिष्यामि तवनान्यस्य कस्यचित् ॥९२॥ यस्य
य कस्य स्वरूपाय जगद्रूपाय ते नमः ॥ महादेवादिदेवाय नमउक्तिं विधेमते ॥९३॥ सर्वे
श्वराय सर्वाय अचिंत्ये विभवाय च ॥ अविचिंत्यमनंते ते जगद्धात्रे नमो नमः ॥९४॥
सूत उवाच ॥ प्राप्तये सर्वविद्यानां लब्धये सर्वसंपदां ॥ इतीदं प्रणवस्यास्य नाम्नां सा
हस्रमीरितं ॥९५॥ फलये सर्वयज्ञानां संततेपर्यवाप्तये ॥ लब्धये सर्वकामानां निग्र
हानुग्रहौ वृते ॥९६॥ इतीदं प्रणवस्यास्य नाम्नां साहस्रमीरितं ॥ लब्धये सर्वतपसां वेदा
नां पर्यवाप्तये ॥९७॥ इतीश्रीस्कंदपुराणे प्रणवकल्पे पंचमोऽध्यायः समाप्तः ॥५॥ छ॥छ॥

K K S U LIBRARY
RAMTEK
441 106
M-899
Dist Nagpur

```
[OrderDescription]
,CREATED=22.10.20 11:02
,TRANSFERRED=2020/10/22 at 11:06:20
,PAGES=24
,TYPE=STD
,NAME=S0004352
,Book Name=M-899-PRANABKAL
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
```

```
FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,
```